# B.K. BIRLA CENTRE FOR EDUCATION

SARALA BIRLA GROUP OF SCHOOLS
A CBSE DAY-CUM-BOYS' RESIDENTIAL SCHOOL

NABET | INDIAN PUBLIC SCHOOLS' CONFERENCE

## ANNUAL EXAMINATION (2025-26)

## SANSKRIT (119)

| | |
|---|---|
| Class : IX | Duration: 3 Hrs |
| Date : 18.02.2026 | Max. Marks: 80 |
| Admission No.: | Roll No.: |

---

सामान्यनिर्देशाः -

1. कृपया सम्यकतया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
2. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| 'क' खण्डः | अपठितावबोधनम् | 10 अङ्काः |
| 'ख' खण्डः | रचनात्मक कार्यम् | 15 अङ्काः |
| 'ग' खण्डः | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| 'घ' खण्डः | पठितावबोधनम् | 30 अङ्काः |

3. प्रत्येक खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. उत्तरलेखनात् पूर्व प्रश्नस्य क्रमाङ्कः अवश्य लेखनीयः।
5. प्रश्नस्य कमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीमानि।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

---

### 'क' खण्डः अपठितावबोधनम् (10 अङ्काः)

प्रश्न 1 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-

एकस्मिन् ग्रामे एकः व्याधः वसति स्म। तस्य नाम भैरवः आसीत्। सः जीविकार्थम् पशून् हत्वा नगरे विक्रीणाति स्म। एकदा सः आखेटाय वनम् अगच्छत्। तत्र तेन एकः मृगः दृष्टः। सः तं मृगम् अमारयत्, तं च नीत्वा गृहं प्रति अचलत्। तदैव सः मार्गे एकं सिंहम् अपश्यत्। तम् सिंहं दृष्ट्वा सः अचिन्तयत् 'यदि एषः सिंहः अपि प्राप्तः भवेत् तर्हि अहं प्रभूतं धनं प्राप्स्यामि'। अनेन लोभेन यावत् सः सिंहं प्रति बाणम् अक्षिपत् तावत् एव सिंहः अपि व्याधस्य ऊपरि आक्रामणम् अकरोत् तदा आघातेन सः व्याधः सिंह: च पञ्चत्वं गतौ।

(1) एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव) - (2X1=2)

(i) व्याधः कुत्र वसति स्म?

(ii) सः आखेटाय कुत्र अगच्छत्?

(iii) भैरवः कः आसीत् ?

(2) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयमेव) (2X2=4)

(i) सिंहं दृष्ट्वा व्याधः किम् अचिन्तयत् ?

(ii) व्याधः सिंहः च कथं पञ्चत्वं गतौ?

(iii) व्याधः जीविकार्थम् किं करोति स्म?

(3) अस्य गद्यांशस्य कृते समुचितं शीर्षकं लिखत। (1X1=1)

(4) भाषिककार्यम् (केवलं प्रश्नत्रयमेव) (3X1=3)

(i) 'क्रीणाति' अस्य पदस्य कः विपर्ययः अत्र दत्तः?

(क) क्रीणीतः (ख) क्रीणति

(ग) विक्रीणाति (घ) विक्रीणति

(ii) अनुच्छेदे 'अचिन्तयत्' इति क्रियायाः कर्तृपदं किम् ?

(क) तम् (ख) सिंहं

(ग) दृष्ट्वा (घ) सः

(iii) 'ग्रामे' इत्यस्य विशेष्यस्य अनुच्छेदे विशेषणं किम् ?

(क) एकस्मिन् (ख) एके

(ग) एकः (घ) वसति स्म

(iv) 'सः आखेटाय वनम् अगच्छत्'। अत्र 'सः' पदं कस्मै प्रयुक्तम् ?

(क) सिंहाय (ख) लोभाय

(ग) भैरवाय (घ) धनाय

'ख' खण्ड:

रचनात्मक कार्यम् (15 अङ्का:)

प्रश्न 2 अस्वस्थतायाः हेतोः दिनद्वयस्य अवकाशार्थम् प्रधानाचार्यं प्रति लिखिते प्रार्थनापत्रे मञ्जूषायाः पदानि चित्वा रिक्तस्थानानि पूरयत- (10×½=5)

परीक्षाभवनम्
पुणे

आदरणीयाः (i) -------------
अंगिरा गुरुकुलम् अमृतपुरम्
नैमिषारण्य:

विषय - अवकाशप्राप्तयमुना निवेदनम्।

सविनयं (ii) ------------- अस्ति यत् अहं (iii) ------------- आक्रान्तः अस्मि, एतस्मात् कारणात् विद्यालयम् आगन्तुम् (iv) -------------- अस्मि । अतः मह्यम् (v) -------------- अवकाशं प्रदाय (vi) --------------- अनुगृह्णन्तु । एतयोः दिवसयोः अध्ययनस्य या (vii) ------------- भविष्यति ताम् (viii) ------------- प्रयत्नं करिष्यामि।

(ix) -------------

भवदीयः शिष्यः
क० ख० ग०

तिथिः (x) ---------------

| मञ्जूषा |
|---|
| दूरीकर्तुम्, हानिः, धन्यवादः, दिनद्वयस्य, प्रधानाचार्याः, असमर्थः, माम्, तीव्रज्वरेण, निवेदनम्, — -02-2026 |

प्रश्न 03 मञ्जूषायाः सहायतया चित्रस्य वर्णनं पञ्चवाक्येषु कुरुत- (1X5=5)



मञ्जूषा- उपवनस्य, बालकाः, बालिकाः, पुष्पाणि पश्यन्ति, वृक्षाः, उपनेत्रम्, धारितः, शिक्षकः

अथवा

मञ्जूषायाः पदानि नीत्वा 'पितृसेवा' इत्यस्मिन् विषये सरलसंस्कृते अनुच्छेदं लिखत-

मञ्जूषा - पितृचरणेषु, स्वर्गः, भवति, शास्त्रेषु, साक्षात् ईश्वरः कथितः, तस्य, सेवा, आनन्द-सुख-युक्ता भवति, मातृमान्, पितृमान्, मातृदेवो भव, पितृदेवो भव

प्रश्न 04 अधोलिखितसंवादं मञ्जूषाप्रदत्तवाक्यैः पूरयत- (10×½=5)

रमा - त्वम् (i) ----------- विद्यालयम् किमर्थम् न आगच्छः?

स्नेहा - ह्यः मम (ii) -------- रुग्णा आसीत् ।

रमा - तव माता केन रोगेण (iii) -------- आसीत् ।

स्नेहा - सा (iv) -------- पीडिता आसीत् ।

रमा - अधुना सा (v) -------- अस्ति न वा?

स्नेहा - (vi) -------- तु सा स्वस्था अस्ति।

रमा - (vii) -------- श्वः विद्यालयम् आगमिष्यसि न वा?

स्नेहा - अहम् (viii) -------- विद्यालयम् अवश्यम् आगमिष्यामि।

रमा - अधुना (ix) -------- चलामि।

स्नेहा - (x) -------- पुनः अपि आगच्छ।

मञ्जूषा - अहम्, ज्वरेण, ह्यः, त्वम्, पीडिता, श्वः, स्वस्था, माता, अधुना, उत्तमम्

अथवा

अधोलिखितकवायाः पूर्ति मञ्जूषायां दत्तानां पदानां सहायतया कुरुत -

अहं (i) ----------- अस्मि। अहं प्रतिदिनम् (ii) ---------- करोमि । मम कविता (iii) --------- आधारिता भवति । अद्य (iv) ----------- कविता न रोचते तथापि (v) ---------- कवितां करोमि । अद्य जनानां पार्श्वे (vi) ---------- नास्ति। जनाः यदा-कदा (vii) ---------- एव (viii) --------- गच्छन्ति । कविता (ix) ---------- आत्मा अस्ति। अतः कविता (x) -------------- ।

मञ्जूषा - साहित्यस्य, जनेभ्यः, द्रष्टुम्, चलचित्राणि, रक्षणीया, सामाजिक-समस्या, कविः, समयः, कविताम्, अहम्

'ग' खण्ड:

अनुप्रयुक्तव्याकरणम् (25 अङ्का:)

प्रश्न 05. अघोलिखितप्रश्नानाम् उत्तराणि लिखत- (2X1=2)

(1) 'अ' वर्णस्य उच्चारणस्यानं किम् ?

(2) 'म्' वर्णस्य उच्चारणस्थानं किम्?

(3) 'गजः' इति पदे कस्य वर्णस्य उच्चारणस्थानं कण्ठः अस्ति?

प्रश्न 06. रेखाङ्कितपदानां सन्धिं विच्छेदं वा कृत्वा लिखत-(केवलं प्रश्नचतुष्टयं) (4X1=4)

(1) अतएव <u>ने + अनम्</u> श्रेष्ठम्।

(2) <u>जगदीश:</u> दयालुः अस्ति।

(3) तत्र कीदृशः <u>विद्यार्थी</u> न आगच्छत् ?

(4) भवतः अत्र <u>सु+ आगतम्</u> अस्ति।

(5) भारते <u>कः + चित्</u> शिबि नाम राजा अभूत्।

प्रश्न 07. उचितविभक्तिपदं विकल्पेभ्यः चित्वा वाक्यानि पूरयत- (केवलं प्रश्नत्रयं) (3X1=3)

(1) एकः छात्रः ----------- विना आगच्छति। (पुस्तक)

(क) पुस्तकम् (ख) पुस्तकस्य

(ग) पुस्तके (घ) पुस्तकयो:

(2) रामः ------------ अलम् । (रावण)

(क) रावणम् (ख) रावणाय

(ग) रावणेन (घ) रावणस्य

(3) छात्र: -------------- भीत: अस्ति। (पठन)

(क) पठनात् (ख) पठने

(ग) पठनेन (घ) पठनस्य

(4) शीला ------------ प्रति कदा गमिष्यति ? (गृह)

(क) गृहम् (ख) गृहस्य

(ग) गृहात् (घ) गृहेण

प्रश्न 08 प्रदत्तेभ्यः विकल्पेभ्यः समुचितं कालबोधकशब्दं चिनुत - (केवलं प्रश्नत्रयं) (3X1=3)

(1) अहं सायं (5:30) ---------- वादने भ्रमणं करोमि ।

(2) केशवः प्रातः (6:00) --------- वादने जागरणं करोति।

(3) कपिल: प्रातः (7:15) -------- वादने विद्यालयं गच्छति।

(4) प्रणवः रात्रौ (8:45) ------------ वादने दूरदर्शनं पश्यति।

प्रश्न 09 अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तैः उचितैः अव्ययपदैः पूरयित्वा लिखत - (4X1=4)

मञ्जूषा

इतस्ततः, अपि, उच्चैः, सम्प्रति

(1) किं त्वम् ------------ वाराणसीं गमिष्यसि ?

(2) -------------- प्रातःकालः अभवत्।

(3) सः सर्वं वृत्तान्तं निवेद्य सकरुणम् ----------- अक्रन्दत् ।

(4) अश्वाः प्राणत्राणाय ------------- अधावन् ।

प्रश्न 10 रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं चित्वा उत्तरपुस्तिकायाम् लिखत - चिनुत- (केवलं प्रश्नत्रयं) (3X1=3)

(1) <u>पठ् + शतृ</u> बालकः शनैः शनैः वदति ।

(क) पठतः (ख) पठन्तम्

(ग) पठन्तौ (घ) पठन्

(2) जनः मुम्बापुरीं <u>गन्तुं</u> रेलयानेन गच्छति ।

(क) गम् + तुम् (ख) गन् + तुम्

(ग) गम् + तुमुन् (घ) गन् + तुमुन्

(3) सुधा <u>पठित्वा</u> क्रीडति ।

(क) पठ् + क्त्वा (ख) पठि + त्वा

(ग) पठ् + त्वा (घ) पाठ् + क्त्वा

(4) सेवकः नृपं <u>प्र + नम् + ल्यप्</u> उपविशति ।

(क) प्रणम्य (ख) प्रणत्वा

(ग) प्रणमितुम् (घ) प्रणयन्

प्रश्न 11 प्रदत्तविकल्पेभ्यः उचितशब्दरूपं चित्वा वाक्यपूर्तिः क्रियताम् -(केवलं प्रश्नद्वयं) (2X1=2)

(1) या बालिका दिल्लीनगरात् आगता ---------- नाम रश्मिः वर्तते । (तत् स्त्री. षष्ठी एकवचनम्)

(क) तस्या (ख) तस्य

(ग) तस्याः (घ) तस्याम्

(2) वसन्तऋतौ वृक्षात् --------- पतन्ति । (पत्र द्वितीया बहुवचनम्)

(क) पत्राणि (ख) पत्रम्

(ग) पत्रात् (घ) पत्रेषु

(3) ---------- नमः। (सूर्य चतुर्थी एकवचनम्)

(क) सूर्यम् (ख) सूर्याय

(ग) सूर्यात् (घ) सूर्येण

प्रश्न 12 निम्नप्रश्नानाम् उत्तराणि निर्देशानुसारेण विकल्पेभ्यः चिनुत- (केवलं प्रश्नद्वयं) (2X1=2)

1. 'चिन्तययः' इति पदे कः लकारो वर्तते ?

(क) लोट् (ख) विधिलिङ्

(ग) लट् (घ) लृट्

2. 'भू' धातोः रूपम् अस्ति ---------।

(क) नमानि (ख) भवानि

(ग) गच्छानि (घ) नयानि

3. पुरा कोऽपि वनवासी मुनिः ----------। (अस)

(क) आसीत् (ख) आसन्

(ग) आस्ताम् (घ) आसीः

प्रश्न 13 उचितेन् संख्यापदेन् वाक्यं प्रपूरयत् - (केवलं प्रश्नद्वयं) (2X1=2)

(i) उद्याने (3) ---------- बालकाः क्रीडन्ति।

(ii) कक्षायां (2) --------- बालिके पठतः।

(iii) तत्र (1) --------- विद्यालयः उत्तमः अस्ति।

## 'घ' खण्ड:
## पठितावबोधनम् (30 अङ्काः)

प्रश्न 14 अधोलिखितं पद्यांशं पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत-

गौरवं प्राप्यते दानात् न तु वित्तस्य सञ्चयात् ।
स्थितिरुच्चैः पयोदानाम् पयोधीनाम् अधः स्थितिः ॥
पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥

(1) एकपदेन उत्तरत- (केवलं प्रश्नद्वयं) (2×½=1)

(i) मनुष्यः कस्मात् गौरवं प्राप्नोति ?

(ii) पयोदानां स्थितिः कीदृशी भवति ?

(iii) पृथिव्यां कति रत्नानि ?

(2) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयं) (2X1=2)

(i) मनुष्यः कस्मात् गौरवं न प्राप्नोति ?

(ii) पृथिव्यां त्रीणि कानि रत्नानि सन्ति ?

(iii) कैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ?

(3) यथानिर्देशम् उत्तरत- (भाषिककार्यम्) (2X1=2)

(i) 'मेघानाम्' इत्यस्य पदस्य अस्मिन् श्लोके पर्यायपदं किम् ?

(क) पयोदानां (ख) स्थितिः

(ग) गौरवम् (घ) पयोधीनाम्

(ii) 'अधः' इत्यस्य पदस्य विलोमपदम् अत्र श्लोके किम् ?

(क) स्थितिः (ख) तु

(ग) उच्चैः (घ) सञ्चयात्

अथवा

(i) अत्र श्लोके 'रत्नानि' इति पदस्य विशेषणपदम् किम् अस्ति ?

(क) पृथिव्याम् (ख) अन्नम्

(ग) त्रीणि (घ) मूढः

(ii) 'विधीयते' इति क्रियापदस्य कर्तृपदं श्लोके किम् अस्ति ?

(क) रत्नसंज्ञा (ख) पाषाण

(ग) मूढेः (घ) रत्नानि

प्रश्न 15 अधोलिखितं गद्यांशं पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत-

अत्र तु दैवम् कारणमिति न उचितम्, अतः सर्वथा दैवम् आलस्यं च विहाय पुरुषार्थः विधेयः। एतत् चिन्तयित्वा राजा पण्डितसभां कारितवान् । राजा अवदत्- 'भोः भोः पण्डिताः ! श्रूयतां मम वचनम्-अस्ति कश्चिद् एवम्भूतो विद्वान् यो मम पुत्राणां नित्यम् उन्मार्गगामिनाम् अनधिगतशास्त्राणाम् इदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः ? अत्रान्तरे विष्णुशर्मनामा महापण्डितः सकलनीतिशास्त्रतत्त्वज्ञः बृहस्पतिः इव अवदत् 'देव। महाकुलसम्भूता एते जपुत्राः, तत् मया नीतिं ग्राहयितुं शक्यन्ते।' अतोऽहं षण्मासाभ्यन्तरे भवत्पुत्रान् नीतिशास्त्राऽभिज्ञान् करिष्यामि। राजा विनयं पुनरवदत्-कोऽत्र सन्देहः ? 'तदेतेषाम् अस्मत्पुत्राणां नीतिशास्त्रोपदेशाय भवन्तः प्रमाणम् इति उक्त्वा तस्य विष्णुशर्मणः करे बहुमानपुरः सरं पुत्रान् समर्पितवान्। ततः विष्णुशर्मा पशु-पक्षि-जन्तूनां मनोरञ्जकाभिः प्रेरणाप्रदाभिश्च कथाभिः तान् राजकुमारान् शिक्षितवान् । एतासां कथानां सङ्कलनमेव 'हितोपदेशः' नामकः ग्रन्थः प्रसिद्धः जातः।

(1) एकपदेन उत्तरत- (केवलं प्रश्नद्वयं) (2×½=1)

(i) नृपः कस्य करे पुत्रान् समर्पितवान्?

(ii) दैवम् आलस्यं च विहाय कः विधेयः ?

(iii) राजा स्वपुत्रान् शिक्षयितुं किं कारितवान् ?

(2) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयं) (2X1=2)

(i) विष्णुशर्मा कीदृशीः कथाः रचितवान्?

(ii) नृपः कथं स्वपुत्रान् समर्पितवान् ?

(iii) राजा पण्डितान् केषां शिक्षया पुनर्जन्म कारयितुं कथयति ?

(3) यथानिर्देशम् उत्तरत- (भाषिककार्यम्) (2X1=2)

(i) 'मम' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(क) पुत्राय (ख) विष्णुशर्मणे

(ग) नृपसुदर्शनाय (घ) पण्डिताय

(ii) 'प्रसिद्धः' इति विशेषणपदस्य कः विशेष्यः अनुच्छेदे लिखितः ?

(क) नामकः (ख) ग्रन्थः

(ग) जातः (घ) हितोपदेशः

अथवा

(i) 'खगः' इति पदस्य कः पर्यायः अनुच्छेदे आगतः?

(क) पशु (ख) पक्षि

(ग) जन्तु (घ) जीव

(ii) अनुच्छेदे 'अप्रसिद्धः' इत्यस्य पदस्य कः विपर्ययः लिखितः ?

(क) प्रसिद्धः (ख) सामान्यः

(ग) नामकः (घ) ग्रन्थः

प्रश्न 16 अधोलिखितनाट्यांशं पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत-

भोजः - अनुगृहीतोऽस्मि । कुतः समागमनम् अत्र भवताम् ?

लक्ष्मीधरः - राजन् ! यत्र जलपूर्ण: सरः भवति, तत्र पक्षिणः स्वयं समायान्ति। अहमपि भवतां विद्यानुरागं दानशीलतां च समाकर्ण्य समागतोऽस्मि। भवद्राज्ये निवस्तुम् इच्छामि ।

भोजः -ममैतत् सौभाग्यं यद् भवादृशाः विद्वांसः मम पण्डितपरिषदं विभूषयेयुः। (मन्त्रिणं प्रति) मन्त्रिवर! नगरपालं समाहूय आदिश्यतां यत् सः लक्ष्मीधरविदुषे निवासव्यवस्थां कारयतु । नगरे कृतनिवासम् अपठितं जनं निःसार्य तद्गृहे एषः पण्डितवरः वासयितव्यः ।

मन्त्री - यथा आज्ञापयति देवः। (निष्क्रम्य पुनः नगरपालेन सह प्रविश्य)

नगरपालः - महाराज! मन्त्रिवरस्य आदेशेन अहं समस्ते नगरे भ्रान्त्वा कमपि निरक्षरं मूर्खं वा जनम् न अपश्यम् । कुत्र वासयितव्यः पण्डितवर्यः ?

भोजराजः - (क्षणं विचार्य) भो नगरपाल! त्वं भूयः नगरं याहि। यः नागरिकः काव्यं कर्तुं न जानाति सः निष्कास्यताम् ।

(1) एकपदेन उत्तरत- (केवलं प्रश्नद्वयं) (2×½=1)

(i) विद्वांसः कस्य पण्डितपरिषदं विभूषयेयुः ?

(ii) के जलपूर्ण: सरः स्वयं समायान्ति ?

(iii) मन्त्री पुनः केन सह प्रविशति ?

(2) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयं) (2X1=2)

(i) लक्ष्मीधरः पण्डितवरः कुत्र वासयितव्यः ?

(ii) कः लक्ष्मीधरविदुषे निवासव्यवस्थां कारयतु ?

(iii) अन्ते भोजराजः नगरपालं किम् आदिशति ?

(3) यथानिर्देशम् उत्तरत- (भाषिककार्यम्) (2X1=2)

(i) 'विभूषयेयुः' इति क्रियापदस्य कर्तृपदं किम् ?

(क) भोजः (ख) मन्त्रिणः

(ग) विद्वांसः (घ) लक्ष्मीधरः

(ii) 'पक्षिणः' इति कर्तृपदस्य क्रियापदं किम् ?

(क) समायान्ति (ख) इच्छामि

(ग) कारयतु (घ) अस्मि

अथवा

(i) 'निवासं करणाय' पदस्य अर्थे किं पदं प्रयुक्तम् ?

(क) निवस्तुम् (ख) समाकर्ण्य

(ग) निःसार्य (घ) समाहूय

(ii) संवादे 'निरक्षरम्' पदस्य कः पर्यायः आगतः?

(क) मूर्खम् (ख) अपठितम्

(ग) जनम् (घ) काव्यम्

प्रश्न 17 रेखांकितपदान् आधृत्य प्रश्ननिर्माणं कुरुत – (केवलं पञ्चप्रश्नाः) (5×1=5)

(i) वृक्षायुर्वेदः <u>महर्षिपराशरेण</u> विरचितः।

(ii) <u>अष्टावक्र:</u> पंडितान् अजयत्।

(iii) <u>चन्दनपादपस्य</u> मूलं भुजंगै: आश्रितम् ।

(iv) आरुणिः <u>तत्वज्ञानं</u> प्रतिपादयति |

(v) राजा <u>पुत्राणाम्</u> आचारहीनतां दृष्ट्वा खिन्नमनसः आसीत्।

(vi) अयं <u>वल्कलै:</u> परितुष्टा।

प्रश्न 18 अधोलिखितश्लोकस्य अन्वयं समुचितपदैः पूरयत - (4×½=2)

छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वमातपे ।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषाः इव ॥

अन्वयः - अन्यस्य (i) ----------- कुर्वन्ति (ii) ------------ च आतपे (iii) -----------।
वृक्षाः (iv) ------------ इव फलानि अपि परार्थाय यच्छन्ति ।

मञ्जूषा

स्वयम्, छायाम्, सत्पुरुषा:, तिष्ठन्ति

अथवा

रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीनाः न शोभन्ते निर्गन्धा इव किंशुकाः ।

अन्वयः - रूप-यौवन-(i) ----------- विशालकुलसम्भवाः (ii) ---------- (जना:) निर्गन्धाः
(iii) ---------- इव न (iv) ----------- |

मञ्जूषा

शोभन्ते, किंशुका:, सम्पन्ना:, विद्याहीनाः

प्रश्न 19 रेखाङ्किङ्कतपदेषु प्रसङ्गानुसारम् उचितम् अर्थचयनं कुरुत-(केवलं प्रश्नचतुष्टयम्) (4×1=4)

(i) सा साध्वी भर्तुः <u>शुश्रूषां</u> कृत्वा मुनेः अन्तिकम् आगता।

(क) श्रोतुमिच्छाम् (ख) सेवाम्

(ग) कथनम् (घ) श्रुत्वा

(ii) अस्ति भागीरथी <u>तीरे</u> पाटलिपुत्रनामकं नगरम् ।

(क) निकटे (ख) तटे

(ग) बाणे (घ) जले

(iii) महाराणाप्रतापः <u>अरण्ये</u> उपविष्टः अस्ति ।

(क) वने (ख) सिंहासने

(ग) अश्वे (घ) गृहे

(iv) अगच्छन् <u>वैनतेयः</u> पदमेकं न गच्छति ।

(क) गरुड़ः (ख) मयूरः

(ग) काकः (घ) शुकः

(v) <u>क्षिप्रम्</u> अक्रियमाणस्य तद् रसं कालः पिबति ।

(क) अधुना (ख) सम्प्रति

(ग) साम्प्रतम् (घ) शीघ्रम्

प्रश्न 20 मञ्जूषायाः सहायतया पाठाधारित कथापूर्तिं कुरुत- (8×½=4)

मुनिपुत्रः (i) ------------- स्वमित्रैः सह खेलित्वा गृहम् आगत्य मातरम् अपृच्छत्- "जननि! मम (ii) ------------- कुत्रास्ति ?" माता अवदत् यत् एकदा सः नृपस्य जनकस्य (iii) ---------- शास्त्रार्थाय गतः आसीत् परमधुना यावत् नागतः। "जननि! अलं चिन्तया, अहं जनकसभां श्वः गत्वा ततः सपितरं आगमिष्यामि" इति (iv) ----------- आश्वस्य अष्टावक्रः जनकनृपस्य सभायां गतवान्। तत्र गत्वा सः राजानं (v) -------------। तस्य वक्रदेहं दृष्ट्वा सर्वे सभास्थिताः विद्वांस उच्चैः अहसन्। तान् हसतः दृष्ट्वा (vi) --------- अपि हसितुम् आरभत् । राजा तं हास्यकारणं पृष्टवान् । अष्टावक्रः अकथयत्- "महाराज ! अहं श्रुतवान् यत् (vii) --------- सभा विद्वद्भिः अलङ्कृता अस्ति । परम् अत्र आगत्य पश्यामि यत् इमे जनाः मम वक्रदेहं दृष्ट्वा हसन्ति अतः अहम् एषाम् (viii) -------- दृष्ट्वा हसामि।"

मञ्जूषा

भवताम्, मूर्खताम्, अष्टावक्रः, मातरम्, प्राणमत्, अष्टावक्रः, सभायाम्, पिता

======================= सफलतायै शुभाशयाः ===================